# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – रामानुजवेदान्तः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः यथाभाष्यं व्याख्या कार्या ।**

१ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
दददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥

२ बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥

३ अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥

**प्रश्नः २ विभूतियोगस्य सारः लेख्यः ।**

**प्रश्नः ३ भगवतः दिव्याः आत्मविभूतयः निरूपणीयाः ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः भाष्यानुगुणं व्याख्या कार्या ।**

१ यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीराः विशन्ति वक्त्राण्यभिज्वलन्ति ॥

२ नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्यं एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

३ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥

**प्रश्नः ५ विश्वरूपस्य भगवतः स्वरूपविवरणं कुरुत ।**

**प्रश्नः ६ विश्वरूपदर्शनेन भीतः अर्जुनः किमुवाच ? यथाभाष्यं व्याख्यात ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः भाष्यानुगुणं व्याख्या कार्या ।**

१ यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥

२ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥

३ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥

**प्रश्नः ८ भक्तलक्षणानि ग्रन्थानुगुणानि व्याख्येयानि ।**

**प्रश्नः ९ द्वादशाध्यायस्य सारः लेख्यः ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ द्वादशाध्याये कति श्लोकाः ?
२ एकादशाध्यायस्य किन्नाम ?
३ दृढनिश्चयः इत्यस्य कः अर्थः ?
४ विभूतियोगस्य विषयः कः ?
५ ते प्राप्नुवन्ति मामेव इत्यस्य कः अभिप्रायः ?
६ केषां मृत्युसंसारसागरात् उद्धारः भवति ?
७ केन चक्षुषा परमात्मानं द्रष्टुं शक्यते ?
८ चराचरस्य पिता कः ?
९ विश्वरूपदर्शनं कस्मिन् अध्याये कारितम् ?
१० देवाः कीदृशं रूपं नित्यं काङ्क्षन्ते ?
११ के भगवन्तं न विदुः ?
१२ कुसुमाकरः अर्थात् किम् ?
१३ कः सर्वपापैः प्रमुच्यते ?
१४ हृषिकेशशब्दस्य कोऽर्थः ?
१५ भक्तियोगस्य निरूपणं कस्मिन् अध्याये कृतम् ?

****